# मित्रभावः ।

1. करावित शरीरस्य नेत्रयोरिव पद्मणी ।
अविचार्य प्रियं कुर्यात्तन्मित्रं मित्रमुच्यते ।।

2. उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ।।

3. परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ।।

4. शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुवृत्तिश्च सत्यता च सुहृत्गुणाः ।।

5. स्वाभाविकं तु यन्मित्रं भाग्येनैवोपजायते ।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ।।

6. न मातरि न दारेषु न सोदर्ये न चात्मनि ।
विश्वासस्तादृशः पुंसां यादिङ्मित्रे स्वभावजे ।।

7. पापान्निवारयति योजयते हिताय
गुह्यानि गुहति गुणान् प्रकटीकरोति ।
आपत्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।

8. आरंभगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ।।

9. येन सौहार्दमिच्छन्ति तेन त्रीणि न कारयेत् ।
वाग्वादमर्थसंबन्धं परोक्षे दारदर्शनम् ।।

10. विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च ।
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ।।

11. सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ।।

12. मित्रं प्रीतिरसायनं नयनोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सहभवेन्मित्रेण तद्दुर्लभं ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुल-
स्ते सर्वत्र मिलन्ति तत्वनिकषग्रावा तु तेषां विपत् ।।

13. औरसं कृतसंबन्धं तथा वंशक्रमागतं ।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ।।